"अनिलस्य शिवा भार्य्या यस्याः पुत्त्रो मनोजवः ॥")
रुद्रस्य पुत्त्रभेदः । यथा, मार्कण्डेये । ५२ । ११ ।
"ईशानेश्वरस्तथा पुत्त्रो लोहिताङ्गो मनोजवः ॥"
तीर्थभेदः । यथा, महाभारते । ३ । ८३ । ८५ ।
"मनोजवे नरः स्नात्वा गोसहस्रफलं लभेत् ॥"
षष्ठमन्वन्तरस्येन्द्रः । यथा, मार्कण्डेये । ७६।५३।
"मनोजवस्तथैवेन्द्रः संख्यातो यज्ञभागभुक् ॥"
मेधातिथेः पुत्त्रभेदः । यथा, भागवते ।५ ।२० ।
२५ । "तस्य प्रियव्रत एवाधिपतिर्नाम्ना मेधातिथिः। सोऽपि विभज्य सप्तवर्षाणि पुत्त्रनामानि तेषु स्वात्मजान् पुरोजवमनोजववेपमानधूम्रानीकचित्ररेफविश्वाधारसंज्ञान् निधाप्याधिपतीन् स्वयं भगवत्यनन्त आवेशितमतिस्तपोवनं प्रविवेश ॥" )

मनोजवः, त्रि, ( मनो जवं वेगवद्यस्मिन् । यद्वा, मनो जवति पितायमिति कृत्वा धावत्यस्मिन् इति। जु वेगवधातुः + अच् ।) पितृतुल्यः । तत्पर्य्यायः । पितृसन्निभः ७ । इत्यमरः । ३।१।१३॥
अतिशयवेगवान् । (यथा, मार्कण्डेये ।२१ । ८ ।
"तमन्वधावद्वेगेन तुरगोऽसौ मनोजवः ॥")

मनोजवसः, त्रि, ( मनो जवत्यस्मिन्। जु + बाहुलकात् असच् । ) पितृसन्निभः । इत्यमरटीकायां स्वामी । ३ । १ । १३ ॥

मनोजवा, स्त्री, ( मनो जवत्यनेति । जु + अच् टाप् । ) अग्निजिह्वाभेदः । इति जटाधरः ॥
(गुणादिविद्धतिरस्या अग्निजिह्वाशब्दे ज्ञातव्या॥ वह्निजिह्वाविशेषः । यथा, मार्कण्डेये । ९९।५४।
"मनोजवा च या जिह्वा लघिमा गुणलक्षणा ।
तया नः पाहि पापेभ्य ऐहिकाच्च महाभयात् ॥"
स्कन्दस्य मातृगणभेदः । यथा, महाभारते । ९ । ४६ । १६ ।
"मनोजवा कण्टकिनी प्रघसा पूतना तथा ॥"
क्रौञ्चद्वीपस्य नदीविशेषः । यथा, मात्स्ये । १२२ । ८७ ।
"गौरी कुमुद्वती चैव सन्ध्या रात्रिर्मनोजवा ॥"
मन इव जवो यस्याः । वेगविशिष्टायां स्त्रियाम् । यथा, महाभारते । १ । १५६ । १८ ।
"अहःसु विहरानेन यथाकामं मनोजवा ॥" )

मनोजवृद्धिः, पुं, (मनोजस्य कामस्य वृद्धिर्यस्मात् ।) कामवृद्धिक्षुपः । इति राजनिर्घण्टः ॥

मनोज्ञा, स्त्री, ( मनो जानाति ज्ञापयति तोषयतीति । अन्तर्भूतण्यर्थे ज्ञा + कः । ) सरलकाष्ठम् । इति रत्नमाला ॥

मनोज्ञं, त्रि, ( मनसा जानातीति । ज्ञा + कः । यद्वा, मनः ज्ञापयति तोषयतीति । अन्तर्भूतण्यर्थज्ञाधातोः कः । ) मनोहरम् । तत्पर्य्यायः । सुन्दरम् २ रुचिरम् ३ चारु ४ सुषमम् ५ साधु ६ शोभनम् ७ कान्तम् ८ मनोरमम् ९ रुच्यम् १० मञ्जु ११ मञ्जुलम् १२ । इत्यमरः । ३ । १ । ५२ ॥ मनोहरम् १३ बन्धुरम् १४ वन्धूरम् १५ पेशलम् १६ पेषलम् १७ सुमनम् १८ वामम् १९ अभिरामम् २० नन्दितम् २१ । इति शब्दरत्नावली ॥ ( यथा, सुश्रुते । १ । ४६ । अध्याये ।
"मनोज्ञं शुचि नात्युष्णं प्रत्यग्रमशनं हितम् ।
पूर्व्वं मधुरमश्नीयात् मध्येऽम्ललवणौ रसौ ॥")

मनोज्ञा, स्त्री, ( मनोज्ञ + स्त्रियां टाप् । ) मनःशिला । इति रत्नमाला ॥ ( यथा, सुश्रुते उत्तरतन्त्रे त्रयोदशाध्याये ।
"क्षिप्तं मनोज्ञाकासीसव्योषाञ्जनकसैन्धवैः ॥")
राजपुत्त्री । इति जटाधरः ॥ वन्ध्याकर्कोटकी । आवर्त्तकी । स्थूलजीरकः । जाती । मदिरा । इति राजनिर्घण्टः ॥

मनोभवः, पुं, ( मनसः मनसि वा भवतीति । भू + अच् । मनसः भव उत्पत्तिर्यस्येति वा । ) कन्दर्पः । इति हलायुधः ॥ (यथा, मार्कण्डेये । १८ । ४१ ।
"ते तां दृष्ट्वाग्रतो दैत्याः साभिलाषा मनोभवम् ।
न शेकुरुद्धर्तुं धैर्य्यात्मनसा वोढुमातुराः ॥"
मनोजन्ये, त्रि । यथा, भागवते । ६ । १५।२४।
"दृश्यमाना विनार्थेन न दृश्यन्ते मनोभवाः ।
कर्म्मभिर्ध्यायतो नाना कर्म्माणि मनसोऽभवन् ॥" )

मनोभूः, पुं, ( मनसः मनसि वा भवतीति । भू + क्विप् । ) कामदेवः । इति शब्दरत्नावली ॥ ( यथा, कलाविलासे । १ । ३३ ।
"श्यामा शुशुभे शशिना तया मनोभूर्मधूत्सवस्तेन ।
मदमुदितमानसानां तेनापि न्मृगीदृशां लीला ॥" )

मनोयोनिः, पुं, ( मन एव योनिरुत्पत्तिस्थानमस्य । ) कामदेवः । इति हेमचन्द्रः ।२।१४२॥

मनोरथः, पुं, (मनसः रथ इव । मन एव रथोऽत्रेति वा ) इच्छा । इत्यमरः । १ । ७ ।२७॥
( यथा, रघौ । ११ । ५६ ।
"इतस्ततश्च वैदेहीमन्वेष्टुं भर्तृचोदिताः ।
कपयश्चेरुरार्त्तस्य रामस्येव मनोरथाः ॥"
कविविशेषः । यथा, राजतरङ्गिण्याम् ।४।४९६।
"मनोरथः शङ्खदत्तश्चटकः सन्धिमांस्तथा ।
बभूवुः कवयस्तस्य वामनाद्याश्च मन्त्रिणः ॥")

मनोरमं, त्रि, ( मनो रमयतीति । रम् + णिच् + अण् । ) मनोज्ञम् । इत्यमरः । ३ । १ । ५२ ॥
( यथा, सुश्रुते । १ । ४६ । अध्याये ॥
"पुरस्ताद्विमले पात्रे सुविस्तीर्णे मनोरमे ।
सूदः सूपौदनं दद्यात् प्रदेहांश्च सुसंस्कृतान् ॥")

मनोरमा, स्त्री, ( मनोरम + स्त्रियां टाप् । ) गोरोचना । इति राजनिर्घण्टः ॥ बुद्धशक्तिविशेषः । तत्पर्य्यायः । तारा २ महाश्रीः ३ ओङ्कारा ४ स्वाहा ५ श्रीः ६ तारिणी ७ जया ८ अनन्ता ९ शिवा १० लोकेश्वरात्मजा ११ खदूरवासिनी १२ भद्रा १३ वैश्या १४ नीलसरस्वती १५ शङ्खिनी १६ महातारा १७ वसुधारा १८ धनन्दा १९ त्रिलोचना २० लोचना २१ । इति त्रिकाण्डशेषः ॥ ( इन्दीवराख्यविद्याधरस्य कन्या । यथा च मार्कण्डेये । ६२ । १३ ।
"अहमिन्दीवराख्यस्य सुता विद्याधरस्य वै ।
नाम्ना मनोरमा जाता सुतायां मरुधन्वनः ॥"
सप्तसरस्वतीनामेकतमा । यथा, महाभारते । ९ । ३८ । ४ ।
"सुप्रभा काञ्चनाक्षी च विशाला च मनोरमा ।
सरस्वती चौघवती सुरेणुर्विमलोदका ॥"
तथा च तत्रैव । ९ । ३८ । २४—२५ ।
"उद्दालकेन यजता पूर्व्वं ध्यात्वा सरस्वती ।
आजगाम सरिच्छ्रेष्ठा तं देशमृषिकारणात् ॥
पूज्यमाना मुनिगणैर्वल्कलाजिनसंवृतैः ।
मनोरमेति विख्याता सा हि तैर्मनसाकृता ॥"
छन्दोविशेषः । तल्लक्षणमुदाहरणञ्च यथा, छन्दोमञ्जर्य्याम् ।
"नरजगैर्भवेन्मनोरमा ।"
"तरणिजातटे विहारिणी व्रजविलासिनी विलासतः ।
मुररिपोर्मुदः पुनातु वः सुकृतशालिनां मनोरमा ॥" )

मनोहृतः, त्रि, (मनसा मनसि वा हृतः ।) प्रतिहतः । इत्यमरः । ३ । १ । ४१ ॥

मनोहरं, त्रि, ( हरतीति । हृ + अच् । मनसो हरमिति । ) मनोज्ञम् । इति शब्दरत्नावली ॥
( यथा, मनौ । २ । ३३ ।
"स्त्रीणां सुखोद्यमक्रूरं विस्पष्टार्थं मनोहरम् ॥"
यथा च मार्कण्डेये । ११२ । ३ ।
"स ददर्श तदा तत्र होमधेनुं मनोहराम् ॥")
कुन्दवृक्षे, पुं । सुवर्णे, क्ली । इति राजनिर्घण्टः ॥

मनोहरा, स्त्री, ( मनोहर + टाप् । ) जाती । स्वर्णयूथी । इति राजनिर्घण्टः ॥ ( धरस्य वसोः पत्नी । यथा, विष्णुपुराणे । १ । १५ । ११४ ।
"मनोहरायाः शिशिरः प्राणोऽथ वरुणस्तथा ॥"
अप्सरोविशेषः । यथा, महाभारते ।१३।१९।४५।
"मनोहरा सुकेशी च सुमुखी हासिनी प्रभा ॥")

मनोहर्त्ता, [ ऋ ] त्रि, ( मनो हरतीति । हृ + तृच् । ) मनोहरणकर्त्ता । यथा,—
"असनं तेऽपनेष्यामि त्रिलोक्यां यदि भावते ।
तमानेष्ये वरं यस्ते मनोहर्त्ता तमादिश ॥"
इति श्रीभागवते १० स्कन्धे ६२ अध्यायः ॥

मनोहारि, [ न् ] त्रि, ( मनो हरति मनो हर्त्तुं शीलमस्येति वा । हृ + णिनिः । ) मनोहरम् । इत्यमरटीकायां स्वामी । तथाहि ।
"गाङ्गं वारि मनोहारि मुरारिचरणच्युतम् ।
त्रिपुरारिशिरश्चारि पापहारि पुनातु माम् ॥"
इति वाल्मीकिकृतगङ्गास्तोत्रम् ॥

मनोह्वा, स्त्री, ( मनः ह्वयति आह्वयतीति । ह्वे + "आतोऽनुपसर्गे कः ।"३।२।३। इति कः । टाप् ।) मनःशिला । इत्यमरः । २ । ९ । १०८॥
( अस्याः पर्य्यायो यथा,—